International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 170-172
© 2026 IJMH
www.themultijournal.com
Received: 17-03-2026
Accepted: 03-04-2026
Publish : 06-04-2026

**स्नेहाञ्जलि साहु**
संस्कृतविभागः,
गुजरातविश्वविद्यालयः,
अहमदाबाद् - ३८०००९

**Correspondence:**
**स्नेहाञ्जलि साहु**
संस्कृतविभागः,
गुजरातविश्वविद्यालयः,
अहमदाबाद् - ३८०००९

# आचार्यबनमालीबिश्वालविरचितकाव्येषु नारीणां सांस्कृतिकायामः

**स्नेहाञ्जलि साहु**

भारतीयसंस्कृतौ नारीणां स्थानं परममहत्त्वपूर्णम् अस्ति। नारी न केवलं परिवारस्य आधारशिला, अपितु समाजस्य संस्कारवाहिका अपि मन्यते। आचार्यवनमालीबिश्वालस्य काव्येषु नारीणां विविधाः सांस्कृतिकाऽयामाः अत्यन्तं सूक्ष्मतया तथा भावपूर्णया शैलीया निरूपिताः सन्ति। नारी एवं प्रकृतैव संसारस्य निर्माणं करोतः। प्रकृति नास्ति चेत् संसार न भवति अतः नारी नास्ति चेत् समाज न भवति इति। वेलेण्टिन्-डे इति काव्ये प्रेमिकायाः सह प्रणय पालना वसर समये कविः कथं प्रकृतेः वर्णनं करोति यथा-

**मा पृच्छायि प्रियतमे !**
**मधुमासस्येह कः सङ्केतः॥**
**आगते नु वेलेण्टाइन्- दिने**
**स्वागताय अस्ति समुद्यतः॥**
**सर्वत्र खेलति क्षेत्रे**
**पीतवर्णं सर्षपकुसुमम्।**
**वेलेण्टाइन् दिवसोऽद्य**
**आतपोऽप्यस्ति नातिशीतोष्णः॥**[1]

अत्र पद्ये कवि वसन्तऋतोः वर्णनं करोति। कथं मधुमासः अथवा वसन्तऋतोः आगमनं भवत्याः स्वागताय सम्पूर्णे परिवेशे अल्पशितोष्ण, कुसुमानां वासः, सर्षप पुष्पस्य पीतवर्णेन सम्पूर्ण वसुन्धरा सुसज्जितः भूत्वा कस्यापि स्वागताय अपेक्षमाणः इति। अतः कवेः सास्कृतिक दृष्टि अपि वहु विस्तृत। उत्कल राज्ये वसन्तऋतोः समये परिवेश किदृशि जायते इति कवि अत्र वर्णितम्। यथा-

**समुपागतां त्वं प्रिये !**
**यथा प्रेमि ऋतुराड् वसन्तः।**
**आगतायां त्वयि मन्ये**
**रोमाञ्चितं प्रकृतेः प्रत्यङ्गम्॥**[2]

अस्मिन् क्रमे कवेः संस्कृतेः वर्णनं **प्रयाग-प्रयाणम्** इत्येकं भ्रमणकाव्ये कृतम्। तत्र कविः भ्रमण कुर्वन् अस्य काव्यस्य रचना कृतम् इति मन्ये यतोहि काव्यमिदम् भ्रमण काव्यत्वेन परिगण्यते।

केदारायणम् इति एका पुनः कवेः संस्कृतेः वर्णनस्य अन्योन्य उदाहरणत्वेन वयं स्वीकर्तुं शक्नुमः। केदारायणम् केवल भगवान्केदारनाथस्य महिमा कथनम् इति न तत्र उत्तारखण्डराज्ये विद्यमानानां समेषां विशिष्टस्थानानं परीचय, तस्य विशेषताः तत्रत्य संस्कृतेः सह अस्मान् योजयति। काव्ये अधिकश्लोकाः नसन्ति परं न्यूने सत्येपि कवि सम्पूर्ण केदारनाथस्य यात्रा वसरे किदृशि वातवरणस्य निर्माणं जायते इत्यस्यापि उपस्थापनं करोति। तत्रत्य जलवायुः, प्राकृतीकसम्पदा, ग्राम्यक्षेत्राणि, कृषिक्षेत्राणि, खाद्यपेयानि, जनजातयः, लोकसंस्कृतिः, भूषणानि, वेशभूषा, लोकसाहित्यम्, नाट्यम्, गीतानि, शिल्पकला इत्यादि सम्पूर्ण वर्णनं कृतम्। यथा –

**निलिप्ता च सन्तरति गोलकवज्जले,**
**स्थलचराः त्रस्ताः किन्तु**
**प्राणभयात् स्थलमन्विष्यन्ति,**

**म्रियन्ते च प्रवासरुद्धाः**
**बहुजलपानात्**
**वन्या ह्रासं प्रतीक्षते**
**राजमार्गे निरन्नजनता,**
**आकाशो हि छत्रं यस्याः**
**कामयते कृपां भागवतीं**
**वर्षातपकष्टविमुक्तये**
**लीलाग्मिः वैदेशिकपरिदर्शकानां**
**छायाचित्रे बघ्नन्ति ये**
**अस्थानसमुद्रं**
**दरिद्रतापराकाष्ठां**
**प्रियस्यास्य भारतवर्षस्य।**[3]

भारतवर्षे विविधाः विधयः भवन्ति तेषु आपद अपि अस्माकं संस्कृतौ अन्तर्भवति। तस्मिन् वन्या एका आपदा भवति तस्य वर्णनं कवि करोति। वन्या द्वारा हानि भवति परं लाभाः अपि भवन्ति। यथा कृषि क्षेत्राणां उर्वरतायाः पुनः नविकरणं भवति। प्राणभयः तु भवति केचनः गृहहिनाः भवन्ति परं नुतन सृष्टेः आरम्भोपि भवति।

**ह्रासं जनयितुं शिशी**
**निष्कारणं स्वयं विहसन्तीं**
**तमपि सुखिनं द्रष्टुं**
**सर्व दुःखमात्मनि पिबन्तीं**
**क्रोडस्थं तं स्वापयितुं**
**स्तन्यं पाययन्तीं**
**चञ्चलमनसं पुत्रं**
**मिथ्या भाययन्तीं**
**दृष्ट्वा तां स्मृतवानहं**
**मद्बाल्ये च दिवंगतां**
**स्वर्गादपि गरीयसीं मम जन्मदात्रीम्।**[4]

जन्मदात्र्याः गुण वर्णनं करोति अत्र किदृशि सा इति।

**यथा भवेत् बलात् संग्रहणम्**
**(हरिलुट इति ओडिआ-भाषायाम्),**
**कः प्राप्नोति अर्धमत्र कः प्राप्नोति पूर्णम् ।**
**कश्चात्र 'अमीरो (धनिकः) 'ऽभवत्**
**अपरः 'फकीरः' (निर्धनः)**
**कश्चनात्र काणः, कुब्जः**
**पङ्गुरसुन्दरः,**
**अपरश्च कामदेवः सर्वाङ्ग-सुन्दरः।**[5]

धनिकः गरिवानां मध्ये समानता भवति। सर्वेपि भिन्नत्वेसति ऐकत्वं धरन्ति।

**सप्ताश्चर्येषु परिगणितं सूर्यदेवस्य पीठम्**
**मध्ये प्रान्ते प्रथितखजुराहोऽपि तुल्याभिरामः।**
**आग्रा रम्या धवलमहलोपाख्यताजाभिधेन**
**गङ्गातीरे बुधजनपुरी सङ्गमेनाभिरामा॥**[6]

कोणार्क मन्दिरस्य वर्णनं करोति यत् अस्माकं समाजस्य आधारभूतः भवति। अस्माकं मन्दिराणि शिल्पकाला अस्माकं समाजस्य सम्पदाः भवन्ति। तेषां रक्षणावेक्षणदायित्वं अस्माकम्। तथैव शान्ति स्तुपः अपि। गङ्गानद्यातीरे या संस्कृति प्रतिष्ठा तस्याः कल्पना अधूना कर्तुं न शक्यते। संस्कृति अस्माकं भारतीयानां तथा विशाल एवं महान्।

**अन्धनगरवासी च चतुष्पटो नृपोऽभवत्।**
**सर्वं सम्पादितं कार्यं विपरीतं स्वजीवने॥**
**वैपरीत्येन दुर्गस्य निर्माणे तत्परो यदा।**
**गुरुः मत्स्येन्द्रनाथस्तु तं मार्गमुपदिष्टवान्॥**[7]
**मानवानां भूषणन्तं देवस्वभाव-संयुतम्।**
**समाजरक्षक बन्दे वन्दे स्वर्गाधिकारिणम्॥**[8]
**नमस्करोमि साष्टाङ्ग दुर्वन्धं प्रतिवेशिनम्।**

वाह्य रुपेण सफलाः किन्तु निजजीवने तस्य स्थितिः अनुकुलनाऽभूत्। लोकव्यवहारे सफलाः आत्मजीवने दुःखि। यदा कोपि विपरित कार्यं कर्तुं आरभ्यते तदा तस्य गुरुः सद्मार्गदर्शनं करोति। मानवनां भूषणं दैवगुणसम्पनः, समाजहितकारी च भवति। यः सज्जनपुरुषः तस्य वन्दना सर्वेपि कुर्वन्ति तदेव अस्माकं संस्कारः भारतीयानाम्। इति एते विषयाः उपरिस्थ श्लोकेषु कथयति।

**स्थान-शुद्धिः, देह-शुद्धिः**
**श्रीविष्णवे नमः,**
**ध्वनि-विस्तारक-यन्त्रे**
**मन्त्रपाठः वैदिक-सम्मतः,**
**सङ्कल्पानन्तरं कृतं**
**कलशे च गङ्गा-जलार्पणम्।**
**'नमो गणेश विघ्नेश,**
**गिरिजानन्दन प्रभो !**
**मम विघ्नं निहत्याशु**
**सर्व-सिद्धिप्रदो भव -इति**
**मन्त्रस्योच्चारणकर्तुः**
**एकनैव प्रहारेण भग्नो नारिकेलः,**
**पूजकस्य हस्ते अर्धमस्ति**
**देवी-मुखं स्पृष्ट्वा अन्यार्धेन**
**मृन्निर्मितो दीपः नष्टो भ्रष्टः।**
**अन्धकारे पुष्पाञ्जलि-दानम्**
**समेषां च शुभ-दृष्टिः**
**दक्षिणा-पात्रेषु पूजार्चन-समापनात् पूर्वम् ।**
**आयोजकश्चिन्तयति**
**कियानर्थः पात्रे संगृहीतः,**
**तस्मिन् पात्रे अक्षिण्यपि**
**पुरोहितस्य, यजमानस्य ।**
**तमसि साधवो यत्र तत्र सन्ति चौराः,**

**दक्षिणामात्मसात्कर्तु सर्वे समातुराः।**
**को वदति- 'अस्थि चर्विष्यामः,**
**को वदति 'ह्वीस्कीं ब्राण्डीं'**
**देश्यं वा पास्यामः,**
**आकण्ठं भोजन-पानैः**
**उपवासं सहर्ष भक्ष्यामः**

अस्मिन् पद्ये विषयद्वयस्य वर्णनं करोति। प्रथमः विषयः धर्मः द्वितीयः संस्कृतिः धर्मसंस्कृत्ययौ विशेष भेदः नास्ति यद्यपि तथापि धर्मः विशेषः भवति संस्कृति सामान्य भवति। अत्र देव्याः पूजन इत्युक्ते पुजा धर्माधारित भवति परं सरस्वती देव्याः पूजनं विद्यालयेषु एतदर्थं क्रियते अस्माकं संस्कृतौ स्त्रीणां सम्माननम् उत्तम संस्कारत्वेन परीगण्यते, एवं छात्रेषु ऐक्यभावनायाः विकासः जायते। पूजायाः विधान तदनु साम्प्रतिक समाजे पूजायाः का स्थितिः इत्यपि दर्शयति। कथं सर्वे पुजापेक्षया दक्षीणा, वाद्याडम्बरे अधिकं प्राधान्यं दीयन्ते तस्यापि कवेः निरीक्षणस्य ज्ञानं अस्मिन् पद्ये कवि उत्तमरीत्या प्रतिपादिता अस्ति। संस्कृतेर्स्माकं नारीणां कृते विशेष दयित्वं प्रादाय तं पुजयति। सरस्वतिदेवी विद्यादेवी इति उच्यते। तद्वत् अस्माकं संस्कृतौ धनार्थं माँ लक्ष्मी, शक्ति वलार्थं दुर्गा देव्याः पुजनादिकं वयं कुर्मः। कदाचिद् अधुना वामपन्थिनः आस्मान् दुषयन्ति परं वयं नारीणां सम्माननम् सर्वप्रथमं कुर्मः तस्योदाहरणम् एतद् रीत्या कार्यक्रममादिषु अवगन्तुं शक्नुमः। अन्ते, एतत् वक्तुं शक्यते यत् आचार्यवनमालीबिश्वालस्य काव्येषु नारीणां सांस्कृतिकायामः बहुविधः, गम्भीरः, तथा प्रेरणादायकः अस्ति। तत्र नारी शिक्षिता, धर्मनिष्ठा, करुणामयी, साहसी रूपेण चित्रिता सन्ति। एषा प्रस्तुति भारतीयसंस्कृतेः मूल्यानां संरक्षणे तथा प्रसारे महत्त्वपूर्णं योगदानं ददाति।

**सन्दर्भग्रन्थसूची –**


1. अमरकोषः -पण्डितशिवदत्तदधिमथः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००७
2. संस्कृतवाङ्गय का बृहद् इतिहास - बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान, 1977
3. सङ्गमेनाभिरामा (1996), बनमाली बिश्वालः , पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद-211019
4. ऋतुपर्णा (1999) बनमाली बिश्वालः , पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद-211019
5. दारुब्रह्म (2001) बनमाली बिश्वालः , पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
6. व्यथा (1997) बनमाली बिश्वालः , पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
7. यात्रा (2002) बनमाली बिश्वालः , पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
8. प्रियतमा(2012) बनमाली बिश्वालः पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
9. वेलेण्डाइन्-डे- सन्देशः - बनमाली बिश्वालः, पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
10. वैष्णोदेवी शतकम् , बनमाली बिश्वालः, वैष्णोदेवी-परकं दैवीय खण्डकाव्यम्


**संदर्भः**

[1] वे.डे. 3,4
[2] वे.डे.34
[3] व्यथा.29
[4] यात्रा.32
[5] यात्रा.83
[6] सङ्ग.रा.4
[7] प्र.प्र.- 289-290
[8] प्र.श.9